Shri Raghunath Temple MSS. Library,
JAMMU

No. १००२-घ

Title सौन्दर्यलहरी

Author श्री शङ्कराचार्य

Extent ८ Age

Subject स्तोत्र

८ ०३

सौन्दर्यलहरी

१००२

सं. १७७२-५१
सौन्दर्यलहरी
८ पत्राणि
[illegible]
कर्ता- श्रीशंकराचार्य

॥सौ०॥ श्रीगणेशाय नमः। श्रीत्रिपुरसौंदर्यै नमः। ॐ शिवः शक्त्या युक्तो यदि भवति शक्तः
॥१॥ प्रभवितुं। न चेदेवं देवो न खलु कुशलः स्पंदितुमपि। अतस्त्वामाराध्यां हरिहरविरिंच्या
दिभिरपि। प्रणंतुं स्तोतुं वा कथमकृतपुण्यः प्रभवति॥१॥ तनीयांसं पांसुं तव चरण
पंकेरुहभवं। विरंचिः संचिन्वन्विरचयति लोकानविकलं। वहत्येनं शौरिः कथमपि स
हस्रेण शिरसा। हरः संक्षुभ्यैनं भजति भसितोद्धूलनविधिं॥२॥ अविद्यानामंतस्ति
मिरमिहिरोद्दीपनकरी। जडानां चैतन्यस्तबकमकरंदश्रुतिसिरा। दरिद्राणां चिंताम
णिगुणनिका जन्मजलधौ। निमग्नानां दंष्ट्रा मुररिपुवराहस्य भवती॥३॥ त्वदन्यः पा
णिभ्यामभयवरदो दैवतगणः। त्वमेका नैवासी प्रकटितवराभीत्यभिनया। भया
त्त्रातुं दातुं फलमपि च वांछासमधिकं। शरण्ये लोकानां तव हि चरणावेव निपुणौ॥४॥
हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननी। पुरा नारी भूत्वा पुररिपुमपि क्षोभमनय
त्। स्मरोपि त्वां नत्वा रतिनयनलेह्येन वपुषा। मुनीनामप्यंतः प्रभवति हि मोहाय मह
तां॥५॥ धनुः पौष्पं मौर्वी मधुकरमयी पंच विशिखा। वसंतः सामंतो मलयमरुदा
योधनरथः। तथाप्येकः सर्वं हिमगिरिसुते कामपि कृपा। मपांगात्ते लब्ध्वा जगदिद
मनंगो विजयते॥६॥ क्वणत्कांचीदामा करिकलभकुंभस्तननता। परिक्षीणा मध्ये ॥शिव॥
परिणतशरच्चंद्रवदना॥ धनुर्बाणान्पाशं सृणिमपि दधाना करतलैः पुरस्तादास्तां नः ॥१॥

पुरमथितुराहोपुरुषिका ॥७॥ सुधासिंधोर्मध्ये सुरविटपिवाटीपरिवृते । मणिद्वी
पेनीपोपवनवति चिंतामणिगृहे । शिवाकारे मंचे परमशिवपर्यंकनिलयां । भजं
ति त्वां धन्याः कतिचन चिदानंदलहरीं ॥८॥ महीं मूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि । मनोपि भ्रूमध्ये सकलमपि भित्वा कु
लपथं । सहस्रारे पद्मे सह रहसि पत्या विहरसि ॥९॥ सुधाधारासारैश्चरणयुगलां
तर्विगलितैः । प्रपंचं सिंचंती पुनरपि रसाम्नायमहसा । अवाप्य स्वां भूमिं भुजगनि
भमध्युष्टवलयं । स्वमात्मानं कृत्वा स्वपिषि कुलकुंडे कुहरिणी ॥१०॥ चतुर्भिः श्री
कंठैः शिवयुवतिभिः पंचभिरपि । प्रभिन्नाभिः शंभोर्नवभिरपि मूलप्रकृतिभिः ।
त्रयश्चत्वारिंशद्वसुदलकलाश्रत्रिवलयं । त्रिरेखाभिः सार्धं तव भवनकोणाः प
रिणताः ॥११॥ त्वदीयं सौंदर्यं तुहिनगिरिकन्ये तुलयितुं । कवींद्राः कल्पंते कथमपि
विरंचिप्रभृतयः । यदालोकौत्सुक्यादमरललना यांति मनसा । तपोभिर्दुष्प्राप्या
मपि गिरिशसायुज्यपदवीं ॥१२॥ नरं वर्षीयांसं नयनविरसं नर्मसु जडं । तवापांगा
लोके पतितमनुधावंति शतशः । गलद्वेणीबंधाः कुचकलशविस्रस्तसिचया
हठात्त्रुट्यत्कांच्यो विगलितदुकूला युवतयः ॥१३॥ क्षितौ षट्पंचाशद्द्विसमधिक
पंचाशदुदके । हुताशे द्वाषष्टिश्चतुरधिकपंचाशदनिले ॥ दिवि द्विः षट्त्रिंशन्मनसि
६

A

॥सौ०॥ चचतुःषष्टिरितिये॥ममत्वास्तेषामप्युपरितवपादांबुजयुगं॥१४॥शरज्ज्योत्स्नाशु
॥२॥ भ्रांशशियुतजटाजूटमुकुटां॥वरत्रासत्राणस्फटिकगुटिकापुस्तककरां॥सकृन्न
त्वानत्वांकथमपिसतांसन्निदधते॥मधुक्षीरद्राक्षामधुरिमधुरीणाभणितयः॥१५॥
कवींद्राणांचेतःकमलवनबालातपरुचिं॥भजंतेयेसंतःकतिचिदरुणामेवभवतीं॥
विरिंचिप्रेयस्यास्तरलतरशृंगारलहरी॥गभीराभिर्वाग्भिर्विदधतिसतांरंजनममी॥
॥१६॥सवित्रीभिर्वाचांशशिमणिशिलाभंगरुचिभिः॥वशिन्याद्याभिस्त्वांसहजननिसं
चिंतयतियः॥सकर्त्ताकाव्यानांभवतिमहतांभंगिसुभगैः॥वचोभिर्वाग्देवीवदनक
मलामोदमधुरैः॥१७॥तनुच्छायाभिस्तेतरुणतरणिश्रीशरणिभिः॥दिवंसर्वामु
र्वीमरुणिमनिमग्नांस्मरतियः॥भवंत्यस्यत्रस्यद्वनहरिणशालीननयनाः॥स
होर्वश्यावश्याःकतिकतिनगीर्वाणगणिकाः॥१८॥मुखंबिंदुंकृत्वाकुचयुगम।
धस्तस्यतदधोहरार्धंध्यायेद्योहरमहिषितेमन्मथकलां॥ससद्यःसंक्षोभंनयतिव
निताइत्यतिलघु॥त्रिलोकीमप्याशुभ्रमयतिरवींदुस्तनयुगां॥१९॥किरंतीमंगे
भ्यःकिरणनिकुरुंबामृतरसं॥हृदित्वामाधत्तेहिमकरशिलामूर्त्तिमिवयः॥ ॥शिव॥
ससर्पाणांदर्पंशमयतिशकुंताधिपइव॥ज्वरप्लुष्टंदृष्ट्यासुखयतिसुधासार ॥२॥
सिरया॥२०॥तडिल्लेखातन्वींशशितपनवैश्वानरमयीं॥निषण्णांषण्णामप्युपरि

कमलानांतवकलौ॥महापद्माटव्यांमृदितमलमायेनमनसा॥महांतःपश्यंतोद
धतिपरमाल्हादलहरीं॥२१॥भवानित्वंदासेमयिवितरदृष्टिंसकरुणां॥मितिस्तोतुं
वांछन्कथयतिभवानित्वमितियः तदैवत्वंतस्मैदिशसिनिजसायुज्यपदवीं॥मुकुं
दब्रह्मेंद्रस्फुटमुकुटनीराजितपदां॥२२॥त्वयाहृत्वावामंवपुरपरितृप्तेनमनसा॥श
रीरार्द्धंशंभोरपरमपिशंकेहृतमभूत्॥तथाहित्वद्रूपंसकलमरुणाभंत्रिनयनं॥कु
चाभ्यामानम्रंकुटिलशशिचूडालमुकुटं॥२३॥जगत्सूतेधाताहरिरवतिरुद्रःक्षपय
ति॥तिरस्कुर्वन्नेतत्स्वमपिवपुरीशःस्थगयति॥सदापूर्वःसर्वंतदिदमनुगृह्णातिच॥
शिवः॥स्तवाज्ञामालंब्यक्षणचलितयोर्भ्रूलतिकयोः॥२४॥त्रयाणांदेवानांत्रिगुणज
नितानांपरशिवे॥भवेत्पूजापूजातवचरणयोर्याविरचिता॥तथाहित्वत्पादोद्वहनमणि
पीठस्यनिकटे॥स्थितात्येतेशश्वन्मुकुलितकरोत्तंसमुकुटाः॥२५॥विरंचिःपंचत्वंव्र
जतिहरिराप्नोतिविरतिं॥विनाशंकीनाशोभजतिधनदोयातिनिधनं॥वितंद्रामाहेंद्री
विततिरपिसंमीलितदृशां॥महासंहारेस्मिन्विहरतिसतित्वत्पतिरसौ॥२६॥जपो
जल्पःशिल्पंसकलमपिमुद्राविरचनं॥गतिःप्रादक्षिण्यक्रमणमशनाद्याहुतविधिः॥
प्रणामःसंवेशःसुखमखिलमात्मार्पणदृशा॥सपर्यापर्यायस्तवभवतुयन्मेविलसि
तं॥२७॥ददानेदीनेभ्यःश्रियमनिशमाशानुसदृशीं॥ममंदंसौंदर्यप्रकरमकरंदंविकि

||सौ०|| रति॥ तवास्मिन्मंदारस्तवकसुभगे यातु चरणे॥ निमज्जन्मज्जीवः करणचरणैः षट्च
||३|| रणतां॥२८॥ सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरणीं॥ विपद्यंते विश्वे विधिशत
3 मखाद्या दिविषदः॥ करालं यत्क्ष्वेडं कवलितवतः कालकलना॥ न शंभोस्तन्मूलं त
व जननि ताडंकमहिमा॥२९॥ किरीटं वैरिंचं परिहर पुरः कैटभभिदः॥ कठोरे कोटीरे स्ख
लसि जहि जंभारिमुकुटं॥ प्रनम्रेष्वेतेषु प्रसभमभियातस्य भवनं॥ शिवस्याभ्युत्थाने
तव परिजनोक्तिर्विजयते॥३०॥ चतुःषष्ट्या तंत्रैः सकलमभिसंधाय भुवनं॥ स्थितस्त
त्तत्सिद्धिप्रसवपरतंत्रैः पशुपतिः॥ पुनस्त्वन्निर्बंधादखिलपुरुषार्थैकघटना॥ स्वतंत्रं
ते तंत्रं क्षितितलमवातीतरदिदं॥३१॥ शिवः शक्तिः कामः क्षितिरथ रविः शीतकिर
णः॥ स्मरो हंसः शक्रस्तदनु च परामारहरयः॥ अमी हृल्लेखाभिस्तिसृभिरवसानेषु
घटिता॥ भजंते वर्णास्ते तव जननि नामावयवतां॥३२॥ स्मरं योनिं लक्ष्मीं त्रितयमिद
मादौ तव मनो॥ निधायैके नित्ये निरवधिमहाभोगरसिकाः॥ भजंति त्वां चिंतामणि
गुणनिबद्धाक्षवलयाः॥ शिवाग्नौ जुह्वंतः सुरभिघृतधाराहुतिशतैः॥३३॥ शरीरं
त्वं शंभोः शशिमिहिरवक्षोरुहयुगं॥ तवात्मानं मन्ये भगवति नवात्मानमनघं॥ अ ||शिव||
तः शेषः शेषीत्ययमुभयसाधारणतया॥ स्थितः संबंधो वां समरसपरानंदरसयोः ||३||
॥३४॥ मनस्त्वं व्योम त्वं मरुदसि मरुत्सारथिरसि॥ त्वमापस्त्वं भूमिस्त्वयि परिणतायां

नहिपरं॥ त्वमेवस्वात्मानंपरिणमयितुंविश्ववपुषा॥ चिदानंदाकारंशिववयुवतिभावे
नविभृषे॥३५॥ तवाज्ञाचक्रस्थंतपनशशिकोटिद्युतिधरं॥ परंशंभुंवन्देपरिमिलि
पांपेस्त तपार्श्वैःपरचिता॥ यमाराध्यन्भक्त्यारविशशिशुचीनामविषये॥ निरालोकेलोकेनि
सैवे वसतिहिभालोकभवने॥३६॥ विशुद्धौतेशुद्धस्फटिकविशदंव्योमजनकं॥ शिवंसेवे
देवीमपिशिवसमानव्यसनिनीं॥ ययोःकांत्यायांत्याशशिकिरणसारूप्यसरणे॥
विधूतान्तर्ध्वांताविलसतिचकोरीवजगती॥३७॥ समुन्मीलत्संवित्कमलमकरंदैक
रसिकं॥ भजेहंसद्वंद्वंकिमपिमहतांमानसचरं॥ यदालापादष्टादशगुणितविद्यापा
रिणति॥ र्यदादत्तेदोषाद्गुणमखिलमद्भ्यःपयइव॥३८॥ तवस्वाधिष्ठानेहुतवहम
धिष्ठायनिरतं॥ तमीडेसंवर्त्तंजननिमहतींतांचसमयां॥ यदालोकेलोकान्दहतिम
हतिक्रोधकलिते॥ दयार्द्रायद्दृष्टिःशिशिरमुपचारंरचयति॥३९॥ तडित्वंतंशक्त्या
तिमिरपरिपंथिस्फुरणया॥ स्फुरन्नानारत्नाभरणपरिणद्धेन्द्रधनुषं॥ तवःश्यामंमे
वंमपि घंजननिमणिपूरैकशरणं॥ निषेवेवर्षंतंहरमिहिरतप्तंत्रिभुवनं॥४०॥ तवाधा
रेमूलेसहसमययालास्यपरया॥ नवात्मानंवंदेनवरसमहातांडवनटं॥ उभाभ्या
मेताभ्यामुभयविधिमुद्दिश्यदयया॥ सनाथाभ्यांजज्ञेजनकजननीमज्जगदिदं॥४१॥
गतैर्माणिक्यत्वंगगनमणिभिःसांद्रघटितं॥ किरीटंतेहैमंहिमगिरिसुतेकीर्तयतुकः॥
तियः

॥सौ०॥ तमीडेयछायाछुरणशबलं चंद्रशकलं ॥ धनुः शौनासीरं किमिदमिति बध्नाति धि
॥४॥ षणां ॥ ४२ ॥ धुनोतु ध्वांतं नस्तुलितदलितेंदीवरवनं ॥ घनं स्निग्धं श्लक्ष्णं
चिकुरनिकुरंबं तव शिवे ॥ यदीयं सौरभ्यं सहजमुपलब्धुं सुमनसो ॥ वसंत्यस्मि
५ न्मन्ये वलमथनवाटीविटपिनां ॥ ४३ ॥ वहंती सिंदूरं प्रबलकबरीभारतिमिरद्वि
षां वृंदैर्बंदीकृतमिव नवीनार्ककिरणं ॥ तनोतु क्षेमं नस्तव वदनसौंदर्यलहरी ॥
परीवाहः स्रोतः सरणिरिव सीमंतसरणिः ॥ ४४ ॥ अरालैः स्वाभाव्यादलिकलभ
सश्रीभिरलकैः ॥ परीतं ते वक्त्रं परिभवति पंकेरुहरुचिं ॥ दरस्मेरे यस्मिन्दशनरु
चिकिंजल्करुचिरे सुगंधौ माद्यंति स्मरमथनचक्षुर्मधुलिहः ॥ ४५ ॥ ललाटं लाव
वि ण्यद्युति विमलमाभाति तव यत् ॥ द्वितीयं तन्मन्ये मुकुटघटितं चंद्रशकलं ॥
विपर्यासन्यासादुभयमपि संभूय च मिथः ॥ सुधालेपः स्यूतिः परिणमति राका
हिमकरः ॥ ४६ ॥ भ्रुवौ भुग्ने किंचिद्भुवनभयभंगव्यसनिनि ॥ त्वदीये नेत्राभ्यां मधु
कररुचिभ्यां धृतगुणं ॥ धनुर्मन्ये सव्येतरकरगृहीतं रतिपतेः ॥ प्रकोष्ठे मुष्टौ च स्थ
गयति निगूढांतरमिदं ॥ ४७ ॥ अहः सूते सव्यं तव नयनमर्कात्मकतया ॥ त्रियामां ॥श्रीव॥
ते वामं ते सृजति रजनीनायकतया ॥ तृतीया ते दृष्टिर्दरदलितनीलांबुजरुचिः ॥ स
माधत्ते संध्यां दिवसनिशयोरंतरचरीं ॥ ४८ ॥ विशाला कल्याणी स्फुटरुचिरयो ॥४॥

ध्याकुवलयैः ॥ रूपा धारा धाराकिमपि मधुराभोगवतिका ॥ अवंती दृष्टिस्ते [illegible]
[illegible] बहुनगरविस्तारविजया ॥ ध्रुवं तत्तन्नामव्यवहरणयोग्या विजय
ते ॥४९॥ कवीनां संदर्भस्तवकमकरंदैकभरितं ॥ कटाक्षव्याक्षेपभ्रमरकलभौ कर्ण
युगलं ॥ अमुं चेतौ दृष्ट्वा तव नवरसास्वादतरलौ ॥ वसूयासंसर्गादलिकनयनं खि कि
दरुणं ॥५०॥ शिवे शृंगारार्द्रा तदितरजने कुत्सनपरा ॥ सरोषा गंगायां गिरिशचरि
ते विस्मयवती ॥ हराहिभ्यो भीता सरसिरुहसौभाग्यजयिनी ॥ सखीषु स्मेरा ते मयि
जननि दृष्टिः सकरुणा ॥५१॥ गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती ॥ पुरां भे
त्तुश्चित्तप्रशमरसविद्रावणफले ॥ इमे नेत्रे गोत्राधरपतिकुलोत्तंसकलिके ॥ तवा
कर्णाकृष्टस्मरशरविलासं कलयतः ॥५२॥ विभक्तत्रैवर्ण्यं व्यतिकरितनीलांजन
तया ॥ विभाति त्वन्नेत्रत्रितयमिदमीशानदयिते ॥ पुनः स्रष्टुं देवान्द्रुहिणहरिरुद्रा
नुपरतान् ॥ रजः सत्त्वं बिभ्रत्तमइति गुणानां त्रयमिव ॥५३॥ तवापर्णे कर्णेजपनय
नपैशुन्यचकिता ॥ निलीयंते तोये नियतमनिमेषाः शफरिकाः ॥ इयं च श्रीर्बद्धच्छ
दपुटकवाटं कुवलयं ॥ जहाति प्रत्यूषे निशि च विघटय्य प्रविशति ॥५४॥ पवित्रीक
र्तुं नः पशुपतिपराधीनहृदये ॥ दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः ॥ नदः शो
णो गंगा तपनतनयेति ध्रुवममुं ॥ त्रयाणां तीर्थानामुपनयसि संभेदमनघं ॥५५॥

।।सौं०।। निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती ।। तवेत्याहुः संतो धरणिधरराजन्यतनये
।।५।। त्वदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः ।। परित्रातुं शंके परिहृतनिमेषास्तव दृशः
५६ ।। दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा ।। दवीयांसं दीनं स्नपय कृपया मा
मपि शिवे ।। अनेनायं धन्यो भवति न च ते हानिरियता । वने वा हर्म्ये वा समकरनिपा
तो हिमकरः ।। ५७ ।। अराले ते पालीयुगलमगराजन्यतनये ।। न केषामाधत्ते कुसुम
शरकोदंडकुतुकं ।। तिरश्चीनो यत्र श्रवणपथमुल्लंघ्य विलसन् ।। अपांगव्यासंगो दि
शति शरसंधानधिषणां ।। ५८ ।। स्फुरद्गंडाभोगप्रतिफलितताटंकयुगलं ।। चतुश्च
क्रं मन्ये तव मुखमिदं मन्मथरथं ।। यमारुह्य द्रुह्यत्यवनिरथमर्केंदुचरणं ।। महावी
रो मारः प्रमथपतये सज्जितवते ।। ५९ ।। सरस्वत्याः सूक्तीरमृतलहरीकौशलहरीः ।।
पिबंत्याः शर्वाणि श्रवणचुलुकाभ्यामविरलं ।। चमत्कारश्लाघाचलितशिरसः कुं
डलगणो ।। रणत्कारैस्तारैः प्रतिवचनमाचष्ट इव ते ।। ६० ।। असौ नासावंशस्तुहि
नगिरिवंशध्वजपटि । त्वदीयो नेदीयः फलतु फलमस्माकमुचितं ।। वहन्नंतर्मुक्ताः
शिशिरतरनिश्वासघटिताः ।। समृद्ध्या यत्तासां बहिरपि च मुक्तामणिधरः ।। ६१ ।। ।।शिव।।
प्रकृत्या रक्ताया स्तव सुदति दंतच्छदरुचेः ।। प्रवक्ष्ये सादृश्यं जनयतु फलं विद्रुमलता ।।५।।
न बिंबं त्वद्बिंबप्रतिफलनरागादरुणितं । तुलामध्यारोढुं कथमिव न लज्जेत कलया
।। ६२ ।।

स्मितज्योत्स्नाजालं तव वदनचंद्रस्य पिबतां चकोराणामासीदतिरसतया चंचुज
डिमा। अतस्ते शीतांशोरमृतलहरीमम्लरुचयः पिबंति स्वच्छंदं निशि निशि भृशं
कांचिकधिया ॥६३॥ अविभ्रांतं पत्युर्गुणगणकथाम्रेडनजपा जपापुष्पच्छाया पग३
तव जननि जिह्वा विजयते यदग्रासीनायाः स्फटिकदृषदच्छच्छविरुचेः सरस्व
त्या मूर्तिः परिणमति माणिक्यवपुषा ॥६४॥ रणे जित्वा दैत्यानपहृतशिरस्त्रैः क रि५
वचिभिर्निवृत्तैश्चंडांशं त्रिपुरहरनिर्माल्यविमुखैः विशाखेंद्रोपेंद्रैः शशिविशदक
र्पूरशकला। विलीयंते मातस्तव वदनतांबूलकबलाः ॥६५॥ विपंच्या गायंती।
विविधमपदानं पशुपते स्त्वयारब्धे वक्तुं चलितशिरसा साधुवचने। तदीयैर्माधुर्यै
रपलपिततंत्रीकलरवां। निजां वीणां वाणी निचुलयति चोलेन निभृतं ॥६६॥ करा
ग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया। गिरीशेनोदस्तं मुहुरधरपानाकुलतया क
रग्राह्यं शंभोर्मुखमकुरवृंतं गिरिसुते। कथंकारं ब्रूमस्तव चिबुकमौपम्यरहितं
॥६७॥ भुजाश्लेषान्नित्यं पुरदमयितुः कंटकवती। तव ग्रीवा धत्ते मुखकमलनालश्रि
यमियं। स्वतः श्वेता कालागुरुबहलजंबालमलिना। मृणालीलालित्यं वहति
यदधो हारलतिका ॥६८॥ गले रेखास्तिस्रो गतिगमकगीतैकनिपुणे। विवाहव्या
नद्धत्रिगुणगुणसंख्याप्रतिभुवः। विराजंते नानाविधमधुररागाकरभुवां। त्रया
णां ग्रामाणां स्थितिनियमसीमान इव ते ॥६९॥

सौं० मृणालीमृद्वीनां तव भुजलतानां चतसृणां ॥ चतुर्भिः सौंदर्यं सरसिजभवः स्तौति
६ वदनैः ॥ नखेभ्यः संत्रस्य प्रथममथनादंधकरिपो ॥ श्चतुर्णां हस्तानां सममभयह शीर्षाणां
स्तार्पणधिया ॥ ७० ॥ नखानामुद्योतैर्नवनलिनरागं विहसतां ॥ कराणां ते कांतिं क
थय कथयामः कथममी ॥ कदाचिद्वा साम्यं भजतु कलया हंत कमलं ॥ यदि क्रीड
ल्लक्ष्मीचरणतललाक्षारुणदलं ॥ ७१ ॥ समं देवि स्कंदद्विपवदनपीतं स्तनयुगं ॥
तवेदं नः खेदं हरतु सततं प्रस्नुतमुखं ॥ यदालोक्याशंकाकुलितहृदयो हासज
नकः ॥ स्वकुंभौ हेरंभः परिमृषति हस्तेन जटिति ॥ ७२ ॥ अमू ते वक्षोजावमृतरस म
माणिक्यकुतुपौ ॥ न संदेहस्पंदो नगपतिपताके मनसि नः ॥ पिबंतौ तौ यस्माद
विदितवधूसंगमरसौ ॥ कुमारावद्यापि द्विरदवदनक्रौंचदलनौ ॥ ७३ ॥ वहत्यं
ब स्तंबेरमदनुजकुंभप्रकृतिभिः ॥ समारब्धां मुक्तामणिभिरमलां हारलतिकां
कुचाभोगो बिंबाधररुचिभिरंतः शबलितां ॥ प्रतापव्यामिश्रां पुरविजयिनः की
धरणिधरं र्तिमिव ते ॥ ७४ ॥ तव स्तन्यं मन्ये तुहिनगिरिकन्ये हृदयतः ॥ पयःपारावारः परि
वहति सारस्वतमिव ॥ दयावत्या दत्तं द्रविडशिशुरास्वाद्य तव यत् ॥ कवीनां प्रौढाना ॥ शिव ॥
मजनि कमनीयः कवयिता ॥ ७५ ॥ हरक्रोधज्वालावलिभिरवलीढेन वपुषा ग ॥ ६ ॥
भीरे ते नाभीसरसि कृतसंगो मनसिजः ॥ समुत्तस्थौ तस्मादचलतनये धूमलतिका

जनस्तां जानीते जननि तव रोमावलिरिति ॥७६॥ यदेतत्कालिंदीतनुतरतरंगाकृति
शिवे कृशे मध्ये किंचिज्जननि तव नद्भाति सुधियां ॥ विमर्दादन्योन्यं कुचकलशा
योरंतरगतं तनूभूतं व्योम प्रविशदिव नाभीकुहरिणी ॥७७॥ स्थिरो गंगावर्त्तः
स्तनमुकुलरोमावलिलता ॥ कलावालं कुंडं कुसुमशरतेजोहुतभुजः रतेर्लीलागा
रं किमपि तव नाभीगिरिसुते ॥ बिलद्वारं सिद्धेर्गिरिशनयनानां विजयते ॥७८॥ नि
सर्गक्षीणस्य स्तनतटभरेण क्लमजुषो ॥ नमन्मूर्त्ते नाभौ वलिषु शनकैस्त्रुट्यत इव
चिरं ते मध्यस्य त्रुटिततटिनीतीरतरुणा ॥ समावस्थास्थेम्नो भवतु कुशलं शैलतन
ये ॥७९॥ कुचौ सद्यः स्विद्यत्तटघटितकूर्पासभिदुरं ॥ कषंतौ दोर्मूले कनककलशाभौ
कलयता ॥ तव त्रातुं भंगादुदरमवलग्नं तनुभुवा ॥ त्रिधा बद्धं देवी त्रिवललवलीवल्लि
भिरिव ॥८०॥ गुरुत्वे विस्तारं क्षितिधरपतिः पार्वति निजां ॥ नितंबादाच्छिद्य त्वयि ह मदन
रणरूपेण निदधे ॥ अतस्ते विस्तीर्णो गुरुरयमशेषां वसुमतीं ॥ नितंबप्राग्भारः स्थ यः
गयति लघुत्वं नयति च ॥८१॥ करींद्राणां शुंडाः कनककदलीकांडपटलीं ॥ उभाभ्यामूरु
भ्यामुभयमपि निर्जित्य भवती ॥ सुवृत्ताभ्यां पत्युः प्रणतिकठिनाभ्यां गिरिसुते ॥ वि
जिग्ये जानुभ्यां विबुधकरिकुंभद्वयमपि ॥८२॥ पराजेतुं रुद्रं द्विगुणशरगर्भौ गिरि
सुते ॥ निषंगौ ते जंघे विषमविशिखो वाढमकृत ॥ यदग्रे दृश्यंते दशशरफलाः पादयु
गली ॥ नखाग्रच्छद्मानः सुरमुकुटशाणैकनिशिताः ॥८३॥

॥सौं०॥ श्रुतीनांमूर्ध्नोदधतितवयौशेखरतया॥ममाप्येतौमातःशिरसिदययादेहि
॥१७॥ चरणौ॥ययोःपाद्यंपाथःपशुपतिजटाजूटतटिनी॥ययोर्लाक्षालक्ष्मीररुणहरि
चूडामणिरुचिः॥८४॥हिमानीहंतव्यंहिमगिरितटाक्रांतिरुचिरौ॥निद्रायांनि
यो द्राणंनिशिचपरभागेचविशदौ॥परंलक्ष्मीपात्रंश्रियमपिसृजंतौसमयिनां॥सरो
जंत्वत्पादौजननिजयतश्चित्रमथकिं॥८५॥नमोवाचंब्रूमोनयनरमणीयायपद
योः॥स्तवास्मैद्वंद्वायस्फुटरुचिरसालक्तकवते॥असूयत्यत्यंतंयदभिहननायस्पृहय
ते॥पशूनामीशानःप्रमदवनकंकेलितरवे॥८६॥मृषाकृत्वागोत्रस्खलनमथवैल
क्ष्यनमितं॥ललाटेभर्तारंचरणकमलेताडयतिते॥चिरादंतःशल्यंदहनकृतमुन्मू
लितवता॥तुलाकोटिक्वाणैःकिलिकिलितमीशानरिपुणा॥८७॥पदंतेकीर्तीनांप्रप
दमपदंदेविविपदां॥कथंनीतंसद्भिःकठिनकमठीकर्परतुलां॥कथंवाबाहुभ्यामुप
यमनकालेपुरभिदा॥यदादायन्यस्तंदृषदिदयमानेनमनसा॥८८॥नखैर्नाकस्त्री
णांकरकमलसंकोचशशिभिः॥तरूणांदिव्यानांहसतइवतेचंडिचरणौ॥फलानि
स्वस्थेभ्यःकिसलयकराग्रेणददतां॥दरिद्रेभ्योभद्रांश्रियमनिशमह्नायददतो॥८९॥ ॥शिवा॥
कदाकालेमातःकथयकलितालक्तकरसं॥पिबेयंविद्यार्थीतवचरणनिर्णेजनजलं॥ ॥१७॥
प्रकृत्यामूकानामपिचकविताकारणतया॥यदाधत्तेवाणीमुखकमलतांबूलरचनां
॥९०॥

पदन्यासक्रीडापरिचयमिवारब्धुमनसः ॥ स्खलंतस्ते खेलं भवनकलहंसा न जहति ॥ स्वपि
क्षेपे शिक्षां सुभगमणिमंजीररणित ॥ छलादाचक्षाणं चरणयुगलं चारुचरिते ॥ ९१ ॥
करालाकेशेषु प्रकृतिसरला मंदहसिते ॥ शिरीषाभा गात्रे दृषदिव कठोरा कुचतटे ॥ भृ
शं तन्वी मध्ये पृथुरपि वरारोहविषये ॥ जगत्त्रातुं शंभोर्जयति करुणा काचिदरुणा ॥ ९२ ॥
पुरारातेरंतःपुरमसि ततस्त्वच्चरणयोः ॥ सपर्यामर्यादा तरलकरणानामसुलभा ॥ तथा ह्ये
ते नीताः शतमखमुखाः सिद्धिमतुलां ॥ तव द्वारोपांतस्थितिभिरणिमाद्याभिरमराः
॥ ९३ ॥ समानीतः पद्भ्यां मणिमुकुरतामंबरमणि ॥ र्भयादंतर्बद्धस्तिमितकिरणश्रेणिम सुस्निग्धाः
सृणः ॥ दधाति त्वद्वक्त्रप्रतिफलितमश्रांतविकचं ॥ निरातंकं चंद्रान्निजहृदयपंकेरुह
मिव ॥ ९४ ॥ गतास्ते मंचत्वं द्रुहिणहरिरुद्रेश्वरमुखाः ॥ शिवः स्वच्छच्छायाकपटघटित
प्रच्छदपटः ॥ त्वदीयानां भासां प्रतिफलनरागारुणतया ॥ शरीरी शृंगारो रस इव दृशां
दोग्धि कुतुकं ॥ ९५ ॥ कलंकः कस्तूरी रजनिकरबिंबं जलमयं ॥ कलाभिः कर्पूरैर्मर
कतकरंडं निबिडितं ॥ अतस्त्वद्भोगेन प्रतिदिनमिदं रिक्तकुहरं ॥ विधिर्भूयो भूयो नि
बिडयति नूनं तव कृते ॥ ९६ ॥ स्वदेहोद्भूताभिर्घृणिभिरणिमाद्याभिरभितो ॥ निषेव्ये
नित्ये त्वामहमिति सदा भावयति यः ॥ किमाश्चर्यं तस्य त्रिणयनसमृद्धिं तृणयतो ॥
महासंवर्ताग्निर्विरचयति नीराजनविधिं ॥ ९७ ॥ समुद्भूतस्थूलस्तनभरमुरश्चारु
हसितं ॥ कटाक्षे कंदर्पाः कतिचन कदंबद्युतिवपुः ॥ हरस्य त्वद्भ्रांतिं मनसिजनया तस्तु वदनैः
कुसुमित

॥ सौं० ॥
॥ १८ ॥

मासमदनो ॥ भवत्यां ये भक्ताः परिणतिरमीषामियमुमे ॥ ९८ ॥ कलत्रं वैधात्रं कति
कति भजंते न कवयः ॥ श्रियो देव्याः को वा भवति न पतिः कैरपि धनैः ॥ महादेवं हित्वा
तव सति सती नाम चरमे ॥ कुचाभ्यामासंगः कुरवकतरोरप्यसुलभः ॥ ९९ ॥ गिरामा
हुर्देवीं द्रुहिणगृहिणीमागमविदो ॥ हरेः पत्नीं पद्मां हरसहचरीमद्रितनयां ॥ तुरीया
कापि त्वं दुरधिगमनिःसीममहिमा ॥ महामाये विश्वं भ्रमयसि परब्रह्ममहिषि ॥ १०० ॥
सरस्वत्या लक्ष्म्या विधिहरिसपत्नो विहरते ॥ रतेः पातिव्रत्यं शिथिलयति रम्येण
वपुषा ॥ चिरंजीवन्नेव क्षपितपशुपाशव्यतिकरः ॥ परब्रह्माभिख्यं रसयति रस
त्वद्भजनवान् ॥ १ ॥ निधे नित्यस्मेरे निरवधिगुणे नीतिनिपुणे ॥ निराघातज्ञाने नि
यमपरचित्तैकनिलये ॥ नियत्या निर्मुक्ते निखिलनिगमांतस्तुतिपदे ॥ निरातंके ।
नित्ये निगमय ममापि स्तुतिमिमां ॥ २ ॥ प्रदीपज्वालाभिर्दिवसकरनीराजनवि
धिः ॥ सुधासूतेश्चंद्रोपलजललवैरर्घ्यघटना ॥ त्वदीयैरंभोभिः सलिलनिधि
सौहित्यकरणं ॥ त्वदीयाभिर्वाग्भिस्तव जननि वाचां स्तुतिरियं ॥ ३ ॥ मंजीरत्नशोभि
चरणं बलक्षशोभि मध्यं तारामकुचमंबुरुहायताक्षं ॥ लीलालकं धरमहीधर ।
कन्यकाख्यं ज्ञानप्रदीपमिह मीमहि दीप्तदीप्ति ॥ ४ ॥ मध्ये दुग्धपयोनिधि प्रक
टिता हेमस्थलीनंदने ॥ तन्मध्ये मणिमंडपं तदुपरि श्रीचक्ररा ॥ जान्वितं ॥ यस्मि
भवतु ॥ श्रीरस्तु ॥ लिखितं जवाहिर गिरस्येदं पुस्तकं पठनार्थे ॥

॥ शिव ॥
॥ १८ ॥